कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ प्रथम काण्डे अष्टमः प्रश्नः॥

हरिः ओम्॥ अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति धेनुर्दक्षिणा ये प्रत्यञ्चः शम्याया अवशीयन्ते तं नैर्ऋतमेककपालं कृष्णं वासः कृष्णतूषं दक्षिणा वीहि स्वाहाऽऽहुतिं जुषाण एष ते निर्ऋते भागो भूते हविष्मत्यसि मुञ्चेममग्ं हसः स्वाहा नमो य इदं चकाराऽऽदित्यं चरुं निर्वपति वरो दक्षिणाऽऽग्नावैष्णवमेकादशकपालं वामनो वही दक्षिणाऽग्नीषोमीय– [१]
मेकादशकपालग्ं हिरण्यं दक्षिणैन्द्रमेकादशकपालमृषभो वही दक्षिणाऽऽग्नेयमष्टाकपालमैन्द्रं दध्यृषभो वही दक्षिणैन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुं प्रथमजो वत्सो दक्षिणा सौम्यग्ग् श्यामाकं चरुं वासो दक्षिणा सरस्वत्यै चरुग्ं सरस्वते चरुं मिथुनौ गावौ दक्षिणा॥[२]

अग्नीषोमीयं चतुस्त्रिग्ंशच्च॥1.8.1॥

आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुग्ं सावित्रं द्वादशकपालग्ं सारस्वतं चरुं पौष्णं चरुं मारुतग्ं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालम्॥[३]

आग्नेयग्ं सौम्यं मारुतमष्टादश॥1.8.2॥

ऐन्द्राग्नमेकादशकपालं मारुतीमामिक्षां वारुणीमामिक्षां कायमेककपालं प्रघास्यान्

हवामहे मरुतो यज्ञवाहसः करम्भेण सजोषसः॥ मो षू ण इन्द्र पृथ्सु देवाऽस्तु स्म ते शुष्मिन्नवया। मही ह्यस्य मीढुषो यव्या। हविष्मतो मरुतो वन्दते गीः॥ यद्ग्रामे यदरण्ये यथ्सभायां यदिन्द्रिये। यच्छूद्रे यदर्य एनश्चकृमा वयम्। यदेकस्याधि धर्मणि तस्यावयजनमसि स्वाहा॥ अक्रन्कर्म कर्मकृतः सह वाचा मयोभुवा। देवेभ्यः कर्म कृत्वाऽस्तं प्रेत सुदानवः॥[४]

वयं यद्विग्ंशतिश्च॥1.8.3॥

अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साकग्ं सूर्येणोद्यता मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुं मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायं चरुं पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत। वस्नेव वि क्रीणावहा इषमूर्जग्ं शतक्रतो॥ देहि मे ददामि ते नि मे धेहि नि ते दधे। निहारमिन्नि मे हरा नि हार– [५] न्नि हरामि ते॥ मरुद्भ्यः क्रीडिभ्यः पुरोडाशग्ं सप्तकपालं निर्वपति साकग्ं सूर्येणोद्यताऽऽग्नेयमष्टाकपालं निर्वपति सौम्यं चरुग्ं सावित्रं द्वादशकपालग्ं सारस्वतं चरुं पौष्णं चरुमैन्द्राग्नमेकादशकपालमैन्द्रं चरुं वैश्वकर्मणमेककपालम्॥ [६]

हरा निहारं त्रिग्ंशच्च॥1.8.4॥

सोमाय पितृमते पुरोडाशग्ं षट्कपालं निर्वपति पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थमेतत्ते तत ये च त्वामन्वेतत्ते पितामह प्रपितामह ये च त्वामन्वत्र पितरो यथाभागं मन्दध्वग्ं सुसंदृशं त्वा वयं मघवन्

मन्दिषीमहि। प्र नूनं पूर्णवन्धुरः स्तुतो यासि वशाग्ं अनु। योजा न्विन्द्र ते हरी॥[७] अक्षन्नमीमदन्त ह्यव प्रिया अधूषत। अस्तोषत स्वभानवो विप्रा नविष्टया मती। योजा न्विन्द्र ते हरी॥ अक्षन् पितरोऽमी मदन्त पितरोऽतीतृपन्त पितरोऽमीमृजन्त पितरः। परेत पितरः सोम्या गम्भीरैः पथिभिः पूर्व्यैः। अथा पितृन्थ्सुविदत्राग्ं अपीत यमेन ये सधमादं मदन्ति॥ मनो न्वा हुवामहे नाराशग्ंसेन स्तोमेन पितृणां च मन्मभिः। आ [८] न एतु मनः पुनः क्रत्वे दक्षाय जीवसे। ज्योक्च सूर्यं दृशे॥ पुनर्नः पितरो मनो ददातु दैव्यो जनः। जीवं व्रातग्ं सचेमहि॥ यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिग्ंसिम। अग्निर्मा तस्मादेनसो गार्हपत्यः प्र मुञ्चतु दुरिता यानि चकृम करोतु मामनेनसम्॥[९]

हरी मन्मभिरा चतुश्चत्वारिग्ंशच्च॥1.8.5॥

प्रतिपूरुषमेककपालान्निर्वपत्येकमतिरिक्तं यावन्तो गृह्याः स्मस्तेभ्यः कमकरं पशूनाग्ं शर्माऽसि शर्म यजमानस्य शर्म मे यच्छैक एव रुद्रो न द्वितीयाय तस्थ आखुस्ते रुद्र पशुस्तं जुषस्वैष ते रुद्र भागः सह स्वस्राऽम्बिकया तं जुषस्व भेषजं गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यं भेषजग्ं सुभेषजं [१०] यथाऽसति। सुगं मेषाय मेष्या अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम्। यथा नः श्रेयसः करद्यथा नो वस्यसः करद्यथा नः पशुमतः करद्यथा नो व्यवसाययात्॥ त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्। एष ते रुद्र भागस्तं जुषस्व तेनाऽवसेन परो मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः॥[११]

सुभेषजमिहि त्रीणि च॥1.8.6॥

ऐन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुमिन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं वायव्यं पयः सौर्यमेककपालं द्वादशगवग्ं सीरं दक्षिणाऽऽग्नेयमष्टाकपालं निर्वपति रौद्रं गावीधुकं चरुमैन्द्रं दधि वारुणं यवमयं चरुं वहिनी धेनुर्दक्षिणा ये देवाः पुरः सदोऽग्निनेत्रा दक्षिणसदो यमनेत्राः पश्चात्सदः सवितृनेत्रा उत्तरसदो वरुणनेत्रा उपरिषदो बृहस्पतिनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यो [१२] नमस्तेभ्यः स्वाहा समूढग्ं रक्षः संदग्धग्ं रक्ष इदमहग्ं रक्षोऽभि सं दहाम्यग्नये रक्षोघ्ने स्वाहा यमाय सवित्रे वरुणाय बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा प्रष्टिवाही रथो दक्षिणा देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याग्ं रक्षसो वधं जुहोमि हतग्ं रक्षोऽवधिष्म रक्षो यद्वस्ते तद्दक्षिणा॥[१३]

तेभ्यः पञ्चचत्वारिग्ंशच्च॥1.8.7॥

धात्रे पुरोडाशं द्वादशकपालं निर्वपत्यनुमत्यै चरुग्ं राकायै चरुग्ं सिनीवाल्यै चरुं कुह्वै चरुं मिथुनौ गावौ दक्षिणाऽऽग्नावैष्णवमेकादशकपालं निर्वपत्यैन्द्रावैष्णवमेकादशकपालं वैष्णवं त्रिकपालं वामनो वही दक्षिणाऽग्नीषोमीयमेकादशकपालं निर्वपतीन्द्रासोमीयमेकादशकपालग्ं सौम्यं चरुं बभ्रुर्दक्षिणा सोमापौष्णं चरुं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुग्ग् श्यामो दक्षिणा वैश्वानरं द्वादशकपालं निर्वपति हिरण्यं दक्षिणा वारुणं यवमयं चरुमश्वो दक्षिणा॥ [१४]

वैश्वानरं द्वादशकपालं निरष्टौ च॥1.8.8॥

बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे शितिपृष्ठो दक्षिणैन्द्रमेकादशकपालग्ं राजन्यस्य गृह ऋषभो दक्षिणाऽऽदित्यं चरुं महिष्यै गृहे धेनुर्दक्षिणा नैर्ऋतं चरुं परिवृक्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नं कृष्णा कूटा दक्षिणाऽऽग्नेयमष्टाकपालग्ं सेनान्यो गृहे हिरण्यं दक्षिणा वारुणं दशकपालग्ं सूतस्य गृहे महानिरष्टो दक्षिणा मारुतग्ं सप्तकपालं ग्रामण्यो गृहे पृश्निश्चर्दक्षिणा सावित्रं द्वादशकपालं [१५] क्षत्तुर्गृह उपध्वस्तो दक्षिणाऽऽश्विनं द्विकपालग्ं संग्रहीतुर्गृहे सवात्यौ दक्षिणा पौष्णं चरुं भागदुघस्य गृहे श्यामो दक्षिणा रौद्रं गावीधुकं चरुमक्षावापस्य गृहे शबल उद्धारो दक्षिणेन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं प्रति निर्वपतीन्द्रायाऽग्ंहोमुचेऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यान् मैत्राबार्हस्पत्यं भवति श्वेतायै श्वेतवथ्सायै दुग्धे स्वयं मूर्ते स्वयं मथित आज्य आश्वत्थे [१६] पात्रे चतुः स्रक्तौ स्वयमवपन्नायै शाखायै कर्णाग् श्चाकर्णाग् श्च तण्डुलान् वि चिनुयाद्ये कर्णाः स पयसि बार्हस्पत्यो येऽकर्णाः स आज्ये मैत्रः स्वयंकृता वेदिर्भवति स्वयंदिनं बर्हिः स्वयंकृत इध्मः सैव श्वेता श्वेतवथ्सा दक्षिणा॥[१७]

सावित्रं द्वादशकपालमाश्वत्थे त्रयस्त्रिग्ंशच्च॥1.8.9॥

अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाग्ं सोमाय वनस्पतये श्यामाकं चरुग्ं सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमाशूनां व्रीहीणाग्ं रुद्राय पशुपतये गावीधुकं चरुं बृहस्पतये वाचस्पतये नैवारं चरुमिन्द्राय

ज्येष्टाय पुरोडाशमेकादशकपालं महाव्रीहीणां मित्राय सत्यायाऽऽम्बानां चरुं वरुणाय धर्मपतये यवमयं चरुग्ं सविता त्वा प्रसवानाग्ं सुवतामग्निर् गृहपतीनाग्ं सोमो वनस्पतीनाग्ं रुद्रः पशूनां [१८] बृहस्पतिर्वाचामिन्द्रो ज्येष्ठानां मित्रः सत्यानां वरुणो धर्मपतीनां ये देवा देवसुवः स्थ त इममामुष्यायणमनमित्राय सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माकं ब्राह्मणाणाग्ं राजा प्रति त्यन्नाम राज्यमधायि स्वां तनुवं वरुणो अशिश्रेच्छुचेर्मित्रस्य व्रत्या अभूमाऽमन्महि महत ऋतस्य नाम सर्वे व्राता वरुणस्याऽभूवन्वि मित्र एवैररातिमतारीदसूषुदन्त यज्ञिया ऋतेन व्यु त्रितो जरिमाणं न आनड्विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि॥[१९]

पशूनां व्राताः पंचविग्ंशतिश्च॥1.8.10॥

अर्थेतस्थ्साऽपां पतिरसि वृषाऽस्यूर्मिर्वृषसेनोऽसि व्रजक्षितस्स्थ मरुतामोजस्स्थ सूर्यवर्चसस्स्थ सूर्यत्वचसस्स्थ मान्दाः स्थ वाशास्थ्स शक्वरीस्थ्स विश्वभृतस्थ्स जनभृतस्थ्साऽग्नेस्तेजस्यास्थ्साऽपामोषधीनाग्ं रसस्थ्साऽपो देवीर्मधुमतीरगृह्णन्नूर्जस्वती राजसूयाय चितानाः। याभिर्मित्रावरुणावभ्यषिञ्चन् याभिरिन्द्रमनयन्नत्यरातीः॥ राष्ट्रदास्थ्स राष्ट्रं दत्त स्वाहा राष्ट्रदास्थ्स राष्ट्रममुष्मै दत्त॥ [२०]

अत्येकादश च॥1.8.11॥

देवीरापः सं मधुमतीर्मधुमतीभिः सृज्यध्वं महि वर्चः क्षत्रियाय वन्वाना अनाधृष्टाः

सीदतोर्जस्वतीर्महि वर्चः क्षत्रियाय दधतीरनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि शुक्रा वः शुक्रेणोत्पुनामि चन्द्राश्चन्द्रेणाऽमृता अमृतेन स्वाहा राजसूयाय चितानाः॥ सधमादो द्युम्निवीरूर्ज एता अनिभृष्टा अपस्युवो वसानः। पस्त्यासु चक्रे वरुणः सधस्थमपाग्ं शिशु [२१] मातृतमास्वन्तः॥ क्षत्रस्योल्बमसि क्षत्रस्य योनिरस्याविन्नो अग्निर्गृहपतिराविन्न इन्द्रो वृद्धश्रवा आविन्नः पूषा विश्ववेदा आविन्नौ मित्रावरुणावृतावृधावाविन्ने द्यावापृथिवी धृतव्रते आविन्ना देव्यदितिर्विश्वरूप्याविन्नोऽयमसावामुष्यायणोऽस्यां विश्यस्मिन् राष्ट्रे महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माकं ब्राह्मणानाग्ं राजेन्द्रस्य [२२] वज्रोऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्याच्छत्रुबाधनास्थ्स पात मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पात दिग्भ्यो मा पात विश्वाभ्यो मा नाष्ट्राभ्यः पात हिरण्यवर्णावुषसां विरोकेऽयस्थूणावुदितौ सूर्यस्यारोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च॥[२३]

शिशुरिन्द्रस्यैकं चत्वारिग्ंशच्च॥1.8.12॥

समिधमा तिष्ठ गायत्री त्वा छन्दसामवतु त्रिवृथ्स्तोमो रथन्तरग्ं सामाग्निर्देवता ब्रह्म द्रविणमुग्रामा तिष्ठ त्रिष्टुप्त्वा छन्दसामवतु पञ्चदशस्तोमो बृहथ्सामेन्द्रो देवता क्षत्रं द्रविणं विराजमा तिष्ठ जगती त्वा छन्दसामवतु सप्तदशस्तोमो वैरूपग्ं साम मरुतो देवता विड्द्रविणमुदीचीमा तिष्ठाऽनुष्टुप्त्वा [२४] छन्दसामवत्वेकविग्ंशः स्तोमो वैराजग्ं साम मित्रावरुणौ देवता बलं द्रविणमूर्ध्वामा तिष्ठ पङ्क्तिस्त्वा छन्दसामवतु त्रिणवत्रयस्त्रिग्ंशौ स्तोमौ शाक्वररैवते सामनी बृहस्पतिर्देवता वर्चो द्रविणमी

दृङ्चाऽन्यादृङ्चैतादृङ्च प्रतिदृङ्च मितश्च सं मितश्च सभराः। शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माग्श्च सत्यश्चर्तपाश्चा [२५] ऽत्यग्ंहाः। अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्लोकाय स्वाहागं्शाय स्वाहा भगाय स्वाहा क्षेत्रस्य पतये स्वाहा पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहाऽद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा चराचरेभ्यः स्वाहा परिप्लवेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा॥[२६]

अनुष्टुप्त्वर्तपाश्च सरीसृपेभ्यस्स्वाहा॥1.8.13॥

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादमृतमसि मृत्योर्मा पाहि दिद्योन्मा पाह्यवेष्टा दन्दशूका निरस्तं नमुचेः शिरः॥ सोमो राजा वरुणो देवा धर्मसुवश्च ये। ते ते वाचग्ं सुवन्तां ते ते प्राणग्ं सुवन्तां ते ते चक्षुः सुवन्तां ते ते श्रोत्रग्ं सुवन्तागं्सोमस्य त्वा द्युम्नेनाऽभि षिञ्चाम्यग्ने [२७] स्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण मित्रावरुणयोर्वीर्येण मरुतामोजसा क्षत्राणां क्षत्रपतिरस्यति दिवस्पाहि समाववृत्रन्नधरागुदीचीरहिं बुध्नियमनु संचरन्तीस्ताः पर्वतस्य वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयानाः॥ रुद्र यत्ते क्रयी परं नाम तस्मै हुतमसि यमेष्टमसि। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयग्ग् स्याम पतयो रयीणाम्॥[२८]

अग्नेस्तैकादश च॥1.8.14॥

इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्त्वयाऽयं वृत्रं वध्यान् मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि यज्ञस्य योगेन विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि मरुतां प्रसवे जेषमाप्तं मनः समहमिन्द्रियेण वीर्येण पशूनां मन्युरसि तवेव मे मन्युर् भूयान्नमो मात्रे पृथिव्यै माऽहं मातरं पृथिवीग्ं हिग्ंसिषं मा [२९] मां माता पृथिवी हिग्ंसीदियदस्यायुरस्यायुर्मे धेह्यूर्गस्यूर्जं मे धेहि युङ्क्ष्वसि वर्चोऽसि वर्चो मयि धेह्यग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहेन्द्रस्य बलाय स्वाहा मरुतामोजसे स्वाहा हग्ंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥[३०]

हिग्ंसिषं मर्तजास्त्रीणि च॥1.8.15॥

मित्रोऽसि वरुणोऽसि समहं विश्वैर्देवैः क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि स्योनामा सीद सुषदामा सीद मा त्वा हिग्ंसीन्मा मा हिग्ंसीन्निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुर्ब्रह्मा ३ न्त्वग्ं राजन् ब्रह्माऽसि सविताऽसि सत्यसवो ब्रह्मा ३ न्त्वग्ं राजन् ब्रह्माऽसीन्द्रोऽसि सत्यौजा [३१] ब्रह्मा ३ न्त्वग्ं राजन् ब्रह्माऽसि मित्रोऽसि सुशेवो ब्रह्मा ३ न्त्वग्ं राजन् ब्रह्माऽसि वरुणोऽसि सत्यधर्मेन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तेन मे रध्य दिशोऽभ्ययग्ं राजाऽभूथ्सुश्लोकाँ ४ सुमङ्गलाँ ४ सत्यराजा ३ न्॥ अपां नप्त्रे स्वाहोर्जो नप्त्रे स्वाहाऽग्नये गृहपतये स्वाहा॥[३२]

सत्यौजाश्चत्वारिग्ंशच्च॥1.8.16॥

आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा सारस्वतं चरुं वथ्सतरी दक्षिणा सावित्रं

द्वादशकपालमुपध्वस्तो दक्षिणा पौष्णं चरुग्ग् श्यामो दक्षिणा बार्हस्पत्यं चरुग्ं शितिपृष्ठो दक्षिणैन्द्रमेकादशकपालमृषभो दक्षिणा वारुणं दशकपालं महानिरष्टो दक्षिणा सौम्यं चरुं बभ्रुर्दक्षिणा त्वाष्ट्रमष्टाकपालग्ं शुण्ठो दक्षिणा वैष्णवं त्रिकपालं वामनो दक्षिणा॥[३३]

आग्नेयग्ं हिरण्यग्ं सारस्वतं द्विचत्वारिग्ंशत्॥1.8.17॥

सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्ति पुण्डरिस्त्रजां प्र यच्छति दशभिर्वथ्सतरैः सोमं क्रीणाति दशपेयो भवति शतं ब्राह्मणाः पिबन्ति सप्तदशाग्ग् स्तोत्रं भवति प्राकाशावध्वर्यवे ददाति स्रजमुद्गात्रे रुक्मग्ं होत्रेऽश्वं प्रस्तोतृप्रतिहर्तृभ्यां द्वादश पष्ठौहीर्ब्रह्मणे वशां मैत्रावरुणाय ऋषभं ब्राह्मणाच्छग्ंसिने वाससी नेष्टापोतृभ्याग् स्थूरि यवाचितमच्छावाकायाऽनड्वाहमग्नीधे भार्गवो होता भवति श्रायन्तीयं ब्रह्मसामं भवति वारवन्तीयमग्निष्टोमसामग्ं सारस्वतीरपो गृह्णाति॥[३४]

वारवन्तीयं चत्वारि च॥1.8.18॥

आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणैन्द्रमेकादशकपालमृषभो दक्षिणा वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा मैत्रावरुणीमामिक्षां वशा दक्षिणा बार्हस्पत्यं चरुग्ं शितिपृष्ठो दक्षिणाऽऽदित्यां मल्हां गर्भिणीमा लभते मारुतीं पृश्निं पष्ठौहीम श्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति सरस्वते सत्यवाचे चरुग्ं सवित्रे सत्य प्रसवाय पुरोडाशं द्वादशकपालं तिसृधन्वग्ं शुष्कदृतिर्दक्षिणा॥[३५]

अग्नेयग्ं हिरण्यमैन्द्रमृषभो वैश्वदेवं पिशङ्गी बार्हस्पत्यग्ं सप्तचत्वारिग्ंशत्॥1.8.19॥

आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुग्ं सावित्रं द्वादशकपालं बार्हस्पत्यं चरुं त्वाष्ट्रमष्टाकपालं वैश्वानरं द्वादशकपालं दक्षिणो रथवाहनवाहो दक्षिणा सारस्वतं चरुं निर्वपति पौष्णं चरुं मैत्रं चरुं वारुणं चरुं क्षैत्रपत्यं चरुमादित्यं चरुमुत्तरो रथवाहनवाहो दक्षिणा॥[३६]

आग्नेयग्ं सौम्यं बार्हस्पत्यं चतुस्त्रिग्ंशत्॥1.8.20॥

स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेणाऽमृताममृतेन सृजामि सग्ं सोमेन सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व पुनातु ते परिस्रुतग्ं सोमग्ं सूर्यस्य दुहिता। वारेण शश्वता तना॥ वायुः पूतः पवित्रेण प्रत्यङ्क्सोमो अतिद्रुतः। इन्द्रस्य युज्यः सखा॥ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय। इहेहैषां कृणुत भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः॥ आश्विनं धूम्रमा लभते सारस्वतं मेषमैन्द्रमृषभमैन्द्रमेकादशकपालं निर्वपति सावित्रं द्वादशकपालं वारुणं दशकपालग्ं सोमप्रतीकाः पितरस्तृप्णुत वडबा दक्षिणा॥[३७]

भोजनानि षड्विग्ंशतिश्च॥1.8.21॥

अग्नाविष्णू महि तद्वां महित्वं वीतं घृतस्य गुह्यानि नाम। दमेदमे सप्त रत्ना दधाना प्रति वां जिह्वा घृतमा चरण्येत्॥ अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणा। दमेदमे सुष्टुतीर्वावृधाना प्रति वां जिह्वा घृतमुच्चरण्येत्॥ प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती। धीनामवित्र्यवतु॥ आ नो दिवो बृहतः [३८] पर्वतादा

सरस्वती यजता गन्तु यज्ञम्। हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु॥ बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य। रास्व रत्नानि दाशुषे॥ एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः। बृहस्पते सुप्रजा वीरवन्तो वयग्ग् स्याम पतयो रयीणाम्॥ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवसा [३९] ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्॥ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजाग्ंसि सुक्रतू॥ प्र बाहवा सिसृतं जीवसे न आ नो गव्यूति मुक्षतं घृतेन। आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा॥ अग्निं वः पूर्व्यं गिरा देवमीडे वसूनाम्। सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम्॥ मक्षू देववतो रथ [४०] श्शूरो वा पृथ्सु कासु चित्। देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्॥ न यजमान रिष्यसि न सुन्वान न देवयो। असदन्न सुवीर्यमुत त्यदाश्वश्वियम्। नकिष्टं कर्मणा नशन्न प्र योषन्न योषति॥ उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः। पृणन्तं च पपुरिं च [४१] श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः॥ सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेशा। आरे बाधेथां निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुक्तमस्मत्॥ सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम्। अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत्॥ सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः। जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम्॥ इमौ देवौ जायमानौ जुषन्तेमौ तमाग्ंसि गूहतामजुष्टा। आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु॥[४२]

बृहतः शवसा रथः पपुरिं च दिवो जनना पञ्चविग्ंशतिश्च॥1.8.22॥

अनुमत्या आग्नेयमैन्द्राग्नमग्नये सोमाय प्रतिपूरुषमैन्द्राग्नं धात्रे बार्हस्पत्यमग्नये गृहपतयेऽर्थतो देवीः समिधग्ं सोमस्येन्द्रस्य मित्र आग्नेयग्ं सद्य आग्नेयग्ं हिरण्यमाग्नेयग्ग् स्वाद्वीं त्वाऽग्नाविष्णू द्वाविग्ंशतिः॥ 22॥

अनुमत्यै यथाऽसति देवीरापो मित्रोसिशूरो वा द्विचत्वारिग्ंशत्॥42॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति प्रथमकाण्डे अष्टमः प्रश्नः॥

॥प्रथमकाण्डः समाप्तः॥